# .. Anjanashailanathastotram ..

# ॥ અઞ્જનશૈલનાથસ્તોત્રમ્ ॥

## Document Information

Text title : anjanashailanAthastotram

File name : anjanashailanAthastotram.itx

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : April 4, 2015

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.


August 2, 2016

*sanskritdocuments.org*

# ॥ અઞ્જનશૈલનાથસ્તોત્રમ્ ॥

પુલકિનિ ભુજમધ્યે પૂજયન્તં પુરન્ધ્રીં
ભુવનનયનપુણ્યં પૂરિતાશેષકામમ્ ।
પુનરપિ વૃષશૈલે ફુલ્લનીલોત્પલાભં
પુરુષમનુભવેયં પુણ્ડરીકાયતાક્ષમ્ ॥ ૧॥

આજાનસૌહૃદમપારકૃપામૃતાબ્ધિં
અવ્યાજવત્સલમવેલસુશીલમાદ્યમ્ ।
આનન્દરાશિમનુરાગમયાવરોધં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૨॥

આતામ્રપાદમવદાતસુવર્ણચેલં
આપીનબાહુશિખરોજ્જ્વલશઙ્ખચક્રમ્ ।
આવિસ્સ્મિતાનનમમન્દદયાકટાક્ષં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૩ ॥

અપ્રાકૃતાવયવસંહિતસંનિવેશં
આરૂઢયૌવનમહીનકુમારભાવમ્ ।
અમ્લાનકાન્તિમતિવાઙ્મનસાનુભાવં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૪॥

આશાવકાશસમુદિત્વરસર્વગન્ધં
આસ્વાદયત્સુગમસર્વરસસ્વભાવમ્ ।
આશ્લેષગમ્યસુખસંસ્પૃશનાતિરેકં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૫॥

આદર્શયન્તમતિસંકુચિતાક્ષિશક્તિં
આશ્રાવયન્તમખિલાન્ બધિરાન્ પ્રકૃત્યા ।
આભાષયન્તમભિતો નતમૂકવર્ગં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૬॥

આધાવયન્તમતિમારુતમેવ પઙ્ગૂન્
આજાનુલમ્બિભુજયન્તમહો કુબાહૂન્ ।
અન્યાંશ્ચ કૃતશિરસઃ પ્રતિજીવયન્તં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૭॥

આજન્મનિર્ધનજનાનલકેશયન્તં
અજ્ઞાનપિ ત્રિદશદેશિકદેશ્યયન્તમ્ ।

અહ્નાય વન્ધ્યમપિ મર્ત્યમવન્ધ્યયન્તં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૮॥

આબદ્ધકઙ્કણમશેષશરણ્યતાયાં
આપત્સહાયમપરાધસહં નતાનામ્ ।
આસન્નસામગસુખાલસસૂરિવર્ગં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૯॥

અધ્યાસિતાસનસરોજસનૂપુરાઙ્ ઘ્રિં
આમુક્તવીરકટકાયતવૃત્તજઙ્ઘમ્ ।
આશ્ચર્યજાનુયુગમપ્રતિમોરુકાણ્ડં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૧૦॥

આવર્તિનિમ્નનિખિલાણ્ડનિદાનનાભિં
આયામિદોર્વિવરકેલિગૃહાવરોધમ્ ।
આબદ્ધરત્નમયભૂષભુજાચતુષ્કં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૧૧॥

અંસાવલમ્બિમણિકુણ્ડલકાન્તગણ્ડં
આવિસ્સ્મિતાંશુમધુરાધરબન્ધુજીવમ્ ।
આસ્યાબ્જસૌરભસમુત્સુકદીર્ઘનાસં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૧૨॥

અર્ધેન્દુભાસ્વદલિકોલ્લસદૂર્ધ્વપુણ્ડ્રં
આલોલનીલકુટિલાલકચારુવક્ત્રમ્ ।
આવિર્મયૂખમણિચૂડમહાકિરીટં
આરાધયામિ હરિમઞ્જનશૈલનાથમ્ ॥ ૧૩ ॥

વાદિભીતિકરાર્યેણ રચિતા ભાવબન્ધ તઃ
શોભતે વેઙ્કટાદ્રીશવિષયા સ્તુતિરદ્ભુતા ॥
॥ ઇતિ અઞ્જનશૈલનાથસ્તોત્રં સંપૂર્ણમ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com
From a telugu book veNkaTeshakAvyakalApa

was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*